**गणेशजननी** स्त्री त०। १दुर्गायां "गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती" तन्त्र०। गणेशमात्रादयोऽप्यत्र।

**गणेशभूषण** न०गणेशं भूषयति भूषि—ल्यु। सिन्दूरे राजनि०। तस्य ध्याने "सिन्दूरशोभाकरम्" इत्युक्तेः सिन्दूरस्य तथात्वम् सिन्दूरेण शोभाकरमिति तदर्थः।

**गणेशान** पु० गणानामीशानः। गणेशे "गणेशानं करिगणेशाननमनामयम्" काशीख०। "ततः सस्मार हेरम्बं व्यासः सत्यवतीसुतः। स्मृतमात्रो गणेशानो भक्तचिन्तितपूरकः" भा० आ० १३ अ०। २शिवे च।

**गणेश्वर** पु० गणानामीश्वरः। १गणेशे २शिवे च। गणात्मक ईश्वरः।३रुद्रादिषु त्रयस्त्रिंशत्संघदेवेषु च। ते च रुद्रादयः ११ आदित्याः १२ वसवः ८ अश्विनौ२। एते त्रयस्त्रिंशत्। रुद्रादीन् एतान् अभिधाय"एते देवास्त्रयस्त्रिंशत् सर्वभूते गणेश्वराः" भा० आनु० १५०अ०।

**गणोत्साह** पुंस्त्री गणे गणभावे सम्भूयकरणे उत्साहोऽस्य। गण्डके त्रिका०। स्त्रियां जातित्वात् ङीष्।

**गण्ड** पु०गडि+वदनैकदेशे अच्। १कपोले(गाल)२हस्तिकपोले च अमरः।३गण्डके पुंस्त्री०४वीथ्यङ्गे५पिटके६चिह्ने७वीरे ८हयभूषणे९बुद्बुदे च मेदि०।१०स्फोटके ११ग्रन्थौ रमानाथः। विष्कुम्भादिषु १२दशमे योगे।१३अश्विन्यादिनक्षत्राणां दण्डभेदे। गण्डमाह ज्यो०त० "अश्विनी मघमूलानां तिस्रो गण्डाद्यनाड़िकाः। अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवना जगुः। मूलेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः। सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगर्क्षयोः। तत्र जातस्य दोषा यथा। सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः। आत्मानं मातरं तातं विनिहन्ति यथाक्रमम्" "मूलयाः प्रथमे पादे पितुर्वपुर्विनश्यति। द्वितीये नियतां पीड़ां मातुः कुर्य्यात् पितुस्तथा। तृतीये धननाशञ्च चतुर्थे सर्वसम्पदः। व्यत्ययेन फलं ज्ञेयमश्लेषास्वपि पूर्ववत्।" "दिवा जाता तु या कन्या निशि जातस्तु यः पुमान्। नोभयोर्गण्डदोषः स्यात् नाचलो हन्ति पार्वतीम्।" विस्तरस्तु मुहूर्त्तचिन्तामणौ पीयूषधारायाञ्चोक्तो यथा। "अभुक्तमूलं घटिकाचतुष्टयं ज्येष्ठान्त्यमूलादिभवं हि नारदः। वसिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेकघटीप्रमाणकम्। अथोचुरन्ये प्रथमाष्टघट्योमूलस्य शाक्रान्तिमपञ्चनाड्यः। जातं शिशुं तत्र परित्यजेद्वा मुखं पिताऽस्याष्टसमा न पश्येत्"। "आद्ये पिता नाशमुपैति मूलपादे, द्वितीये जननी तृतीये। धनं चतुर्थोऽस्य शुभोऽथ शान्त्या सर्वत्र सत् स्यादहिभे विलोमम्। स्वर्गे शुचिप्रोष्ठपदेषमाघे भूमौ नभःकार्त्तिकचैत्रपौषे। मूलं ह्यधस्तात्तु तपस्यमार्गवैशाखशुक्रेष्वशुभं च तत्र। गण्डान्तेन्द्रभम्मूलपातपरिघव्याघातगण्डावमे संक्रान्तिव्यतिपातवैधृतिसिनीवालीकुहूदर्शके। वज्रे कृष्णचतुर्द्दशीषु यमघण्टे दग्धयोगे मृतौ विष्टौ सोदरभे जनिर्न पितृभे शस्ता शुभा शान्तितः"मु०चि०। एतद्व्याख्या पी०धा० "अत्राभुक्तमूलस्यानेके भेदाः तत्रैकस्तावदयं भेदः ज्येष्ठानक्षत्रान्तेभवं ज्येष्ठान्त्यं मूलादौ भवं मूलादिभवं ज्येष्ठान्त्यजातं घटीचतुष्टयं मूलादिजातं घटीचतुष्टयं मिलित्वाष्टौ घटिकाः प्रहर इति यावत्तावान् कालोऽभुक्तमूलाख्यः (गण्डाख्यः) इति नारद आह (उपलक्षणत्वादश्लेषान्तिमघटीचतुष्टयं मघादिमघटीचतुष्टयं चाभुक्तमूलाख्यः कालः यदाह नारदः"यो ज्येष्ठामूलयोरन्तरालप्रहरजः शिशुः। अभुक्तमूलजः सार्पमघानक्षत्रयोरपीति"। तथापरोभेदः एकेति ज्येष्ठान्ते एकघटीमितं मूलादौ घटीद्वयमितमेवं मिलित्वा त्रिघटिकमभुक्तमूलं स्यादिति वसिष्ठमुनिर्जगौ यदाह वसिष्ठः "ज्येष्ठान्त्यपादघटिकामितमेव केचिन् मूलं ह्यभुक्तमपरे पुनरामनन्ति। मूलाद्यपादघटिकाद्वितयेन सार्द्धमष्टौ समाःपरिहरेदिह जन्मभाजमिति"समा वर्षाणि। अथान्योभेदः एकेति ज्येष्ठान्त्यार्द्धघटिका मूलाद्यार्द्धघटिका मिलित्वा एकघटी प्रमाणमस्य तदेकघटीप्रमाणकं "शेषाद्विभाषा" इति पा०कप् तादृशमभुक्तमूलं स्यादिति बृहस्पतिर्जगौ तदाह गुरुः"ज्येष्ठान्त्यघटिकार्द्धञ्च मूलादौ घटिकार्द्धकम्। तयोरन्तर्गता नाड़ी ह्यभुक्तमूलमुच्यत" इति अथेतरो भेदः अथेति अथशब्दः पादपूरणे मूलनक्षत्रस्य प्रथमा आदिमा अष्ट घटिकाः शाक्रस्य ज्येष्ठायाः अन्तिमाः पञ्च नाड्यः पञ्च घटिकाः। एवमुभयोर्ज्येष्ठामूलयोरन्तरालवर्त्तिन्यस्त्रयोदशघटिका अभुक्तमूलमिति लोका ऊचुः। "ज्येष्ठान्त्यघटिकाः पञ्च मूलाद्या वसुनाड़िकाः। अभुक्तमूलमित्युक्तं तत्र जातं शिशुं त्यजेदिति"स्मरणात्। एवमभुक्तमूलस्यानेकभेदसम्भवे कः साधीयान् पक्ष इति चेत् उच्यते नारदोक्तः पक्ष एव साधीयान् किमत्र प्रमाणमिति चेत् शृणु बहुमुनिसंवाद एवात्र प्रमाणं तदाह कश्यपः ज्येष्ठान्त्यमूलयोरन्तरालयामोद्भवः शिशुः। अभुक्तमूलजः सोऽप्यश्लेषापितृभयोरपीति"। वसिष्ठोऽपि "भुजङ्गपौर-